.. shAkinIsadAshivastavanama NgalAShTottarasahasranAmastotra ..

# ॥ शाकिनीसदाशिवस्तवनमङ्गलाष्टोत्तरसहस्रनामस्तोत्र ॥

श्रीगणेशाय नमः ।
श्रीआनन्दभैरवी उवाच ।
कैलासशिखरारूढ पञ्चवक्त्र त्रिलोचन ।
अभेद्यभेदकप्राणवल्लभ श्रीसदाशिव ॥ १ ॥
भवप्राणप्ररक्षाय कालकूटहराय च ।
प्रत्यङ्गिरापादुकाय दान्तं शब्दमयं प्रियम् ॥ २ ॥
इच्छामि रक्षणार्थाय भक्तानां योगिनां सदाम् ।
अवश्यं कथयाम्यत्र सर्वमङ्गललक्षणम् ॥ ३ ॥
अष्टोत्तरसहस्राख्यं सदाशिवसमन्वितम् ।
महाप्रभावजननं दमनं दुष्टचेतसाम् ॥ ४ ॥
सर्वरक्षाकरं लोके कण्ठपद्मप्रसिद्धये ।
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ॥ ५ ॥
योगसिद्धिकरं साक्षाद् अमृतानन्दकारकम् ।
विषज्वालादिहरणं मन्त्रसिद्धिकरं परम् ॥ ६ ॥
नाम्नां स्मरणमात्रेण योगिनां वल्लभो भवेत् ।
सदाशिवयुतां देवीं सम्पूज्य संस्मरेद् यदि ॥ ७ ॥
मासान्ते सिद्धिमाप्नोति खेचरीमेलनं भवेत् ।
आकाशगामिनीसिद्धिः पठित्वा लभ्यते ध्रुवम् ॥ ८ ॥
धनं रत्नं क्रियासिद्धिं विभूतिसिद्धिमां लभेत् ।
पठनाद् धारणाद्योगी महादेवः सदाशिवः ॥ ९ ॥
विष्णुश्चक्रधरः साक्षाद् ब्रह्मा नित्यं तपोधनः ।
योगिनः सर्वदेवाश्च मुनयश्चापि योगिनः ॥ १० ॥
सिद्धाः सर्वे सञ्चरन्ति धृत्वा च पठनाद् यतः ।
ये ये पठन्ति नित्यं तु ते सिद्धा विष्णुसम्भवाः ॥ ११ ॥
किमन्यत् कथनेनापि भुक्तिं मुक्तिं क्षणाल्लभेत् ॥ १२ ॥
अस्य श्रीभुवनमङ्गलमहास्तोत्राष्टोत्तरसहस्रनाम्नः ,
श्रीसदाशिवऋषिः , गायत्रीच्छन्दः , श्रीसदाशिवशाकिनीदेवता ,
पुरुषार्थाष्टसिद्धिसमययोगसमृद्धये विनियोगः ।
ॐ शाकिनी पीतवस्त्रा सदाशिव उमापतिः ।
शाकम्भरी महादेवी भवानी भुवनप्रियः ॥ १३ ॥
योगिनी योगधर्मात्मा योगात्मा श्रीसदाशिवः ।
युगाद्या युगधर्मा च योगविद्या सुयोगिराट् ॥ १४ ॥

योगिनी योगजेताख्यः सुयोगा योगशङ्करः ।
योगप्रिया योगविद्वान् योगदा योगषड्भुविः ॥ १५ ॥
त्रियोगा जगदीशात्मा जापिका जपसिद्धिदः ।
यत्नी यत्नप्रियानन्दो विधिज्ञा वेदसारवित् ॥ १६ ॥
सुप्रतिष्ठा शुभकरो मदिरा मदनप्रियः ।
मधुविद्या माधवीशः क्षितिः क्षोभविनाशनः ॥ १७ ॥
वीतिज्ञा मन्मथघ्नश्च चमरी चारुलोचनः ।
एकान्तरा कल्पतरुः क्षमाबुद्धो रमासवः ॥ १८ ॥
वसुन्धरा वामदेवः श्रीविद्या मन्दरस्थितः ।
अकलङ्का निरातङ्कः उतङ्का शङ्कराश्रयः ॥ १९ ॥
निराकारा निर्विकल्पो रसदा रसिकाश्रयः ।
रामा रामननाथश्च लक्ष्मी नीलेषुलोचनः ॥ २० ॥
विद्याधरी धरानन्दः कनका काञ्चनाङ्गधृक् ।
शुभा शुभकरोन्मत्तः प्रचण्डा चण्डविक्रमः ॥ २१ ॥
सुशीला देवजनकः काकिनी कमलाननः ।
कज्जलाभा कृष्णदेहः शूलिनी खड्गचर्मधृक् ॥ २२ ॥
गतिग्राह्यः प्रभागौरः क्षमा क्षुब्धः शिवा शिवः ।
जवा यतिः परा हरिर्हराहरोऽक्षराक्षरः ॥ २३ ॥
सनातनी सनातनः श्मशानवासिनीपतिः ।
जयाक्षयो धराचरः समागतिः प्रमापतिः ॥ २४ ॥
कुलाकुलो मलाननो वलीवला मलामलः ।
प्रभाधरः परापरः सरासरः कराकरः ॥ २५ ॥
मयामयः पयापयः पलापलो दयादयः ।
भयाभयो जयाजयो गयागयः फलान्वयः ॥ २६ ॥
समागमो धमाधमो रमारमो वमावमः ।
वराङ्गणा धराधरः प्रभाकरो भ्रमाभ्रमः ॥ २७ ॥
सती सुखी सुलक्षणा कृपाकरो दयानिधिः ।
धरापतिः प्रियापतिवीरागिणी मनोन्मनः ॥ २८ ॥
प्रधाविनी सदाचलः प्रचञ्चलातिचञ्चलः ।
कटुप्रिया महाकटुः पटुप्रिया महापटुः ॥ २९ ॥
धनावली गणागणी खराखरः फणिः क्षणः ।
प्रियान्विता शिरोमणिस्तु शाकिनी सदाशिवः ॥ ३० ॥
रुणारुणो घनाघनो हयी हयो लयी लयः ।
सुदन्तरा सुदागमः खलापहा महाशयः ॥ ३१ ॥
चलत्कुचा जवावृतो घनान्तरा स्वरान्तकः ।
प्रचण्डघर्घरध्वनिः प्रिया प्रतापवह्निगः ॥ ३२ ॥

प्रशान्तिरुन्दुरुस्थिता महेश्वरी महेश्वरः ।
महाशिवाविनी घनी रणेश्वरी रणेश्वरः ॥ ३३ ॥
प्रतापिनी प्रतापनः प्रमाणिका प्रमाणवित् ।
विशुद्धवासिनी मुनिविशुद्धविन्मधूत्तमा ॥ ३४ ॥
तिलोत्तमा महोत्तमः सदामया दयामयः ।
विकारतारिणी तरुः सुरासुरोऽमरागुरुः ॥ ३५ ॥
प्रकाशिका प्रकाशकः प्रचण्डिका विभाण्डकः ।
त्रिशूलिनी गदाधरः प्रवालिका महाबलः ॥ ३६ ॥
क्रियावती जरापतिः प्रभाम्बरा दिगम्बरः ।
कुलाम्बरा मृगाम्बरा निरन्तरा जरान्तरः ॥ ३७ ॥
श्मशाननिलया शम्भुर्भवानी भीमलोचनः ।
कृतान्तहारिणीकान्तः कुपिता कामनाशनः ॥ ३८ ॥
चतुर्भुजा पद्मनेत्रो दशहस्ता महागुरुः ।
दशानना दशग्रीवः क्षिप्ताक्षी क्षेपनप्रियः ॥ ३९ ॥
वाराणसी पीठवासी काशी विश्वगुरुप्रियः ।
कपालिनी महाकालः कालिका कलिपावनः ॥ ४० ॥
रन्ध्रवर्त्मस्थिता वाग्मी रती रामगुरुप्रभुः ।
सुलक्ष्मीः प्रान्तरस्थश्च योगिकन्या कृतान्तकः ॥ ४१ ॥
सुरान्तका पुण्यदाता तारिणी तरुणप्रियः ।
महाभयतरा तारास्तारिका तारकप्रभुः ॥ ४२ ॥
तारकब्रह्मजननी महादृप्तः भवाग्रजः ।
लिङ्गगम्या लिङ्गरूपी चण्डिका वृषवाहनः ॥ ४३ ॥
रुद्राणी रुद्रदेवश्च कामजा काममन्थनः ।
विजातीया जातितातो विधात्री धातृपोषकः ॥ ४४ ॥
निराकारा महाकाशः सुप्रविद्या विभावसुः ।
वासुकी पतितत्राता त्रिवेणी तत्त्वदर्शकः ॥ ४५ ॥
पताका पद्मवासी च त्रिवार्ता कीर्तिवर्धनः ।
धरणी धारणाव्याप्तो विमलानन्दवर्धनः ॥ ४६ ॥
विप्रचित्ता कुण्डकारी विरजा कालकम्पनः ।
सूक्ष्माधारा अतिज्ञानी मन्त्रसिद्धिः प्रमाणगः ॥ ४७ ॥
वाच्या वारणतुण्डश्च कमला कृष्णसेवकः ।
दुन्दुभिस्था वाद्यभाण्डो नीलाङ्गी वारणाश्रयः ॥ ४८ ॥
वसन्ताद्या शीतरश्मिः प्रमाद्या शक्तिवल्लभः ।
खड्गना चक्रकुन्ताढ्यः शिशिराल्पधनप्रियः ॥ ४९ ॥
दुर्वाच्या मन्त्रनिलयः खण्डकाली कुलाश्रयः ।
वानरी हस्तिहाराद्यः प्रणया लिङ्गपूजकः ॥ ५० ॥

मानुषी मनुरूपश्च नीलवर्णा विधुप्रभः ।
अर्धश्चन्द्रधरा कालः कमला दीर्घकेशधृक् ॥ ५१ ॥
दीर्घकेशी विश्वकेशी त्रिवर्गा खण्डनिर्णयः ।
गृहिणी ग्रहहर्ता च ग्रहपीडा ग्रहक्षयः ॥ ५२ ॥
पुष्पगन्धा वारिचरः क्रोधादेवी दिवाकरः ।
अञ्जना क्रूरहर्ता च केवला कातरप्रियः ॥ ५३ ॥
पद्मामयी पापहर्ता विद्याद्या शैलमर्दकः ।
कृष्णजिह्वा रक्तमुखो भुवनेशी परात्परः ॥ ५४ ॥
वदरी मूलसम्पर्कः क्षेत्रपाला बलानलः ।
पितृभूमिस्थिताचार्यो विषया बादरायणिः ॥ ५५ ॥
पुरोगमा पुरोगामी वीरगा रिपुनाशकः ।
महामाया महान्मायो वरदः कामदान्तकः ॥ ५६ ॥
पशुलक्ष्मीः पशुपतिः पञ्चशक्तिः क्षपान्तकः ।
व्यापिका विजयाच्छन्नो विजातीया वराननः ॥ ५७ ॥
कटुमूर्तीः शाकमूर्तीस्त्रिपुरा पद्मगर्भजः ।
अजाब्या जारकः प्रक्ष्या वातुलः क्षेत्रबान्धवा ॥ ५८ ॥
अनन्तानन्तरूपस्थो लावण्यस्था प्रसञ्चयः ।
योगज्ञो ज्ञानचक्रेशो बभ्रमा भ्रमणस्थितः ॥ ५९ ॥
शिशुपाला भूतनाशो भूतकृत्या कुटुम्बपः ।
तृप्ताश्वत्थो वरारोहा वटुकः प्रोटिकावशः ॥ ६० ॥
श्रद्धा श्रद्धान्वितः पुष्टिः पुष्टो रुष्टाष्टमाधवा ।
मिलिता मेलनः पृथ्वी तत्त्वज्ञानी चारुप्रिया ॥ ६१ ॥
अलब्धा भयहन्त्या दशनः प्राप्तमानसा ।
जीवनी परमानन्दो विद्याढ्या धर्मकर्मजः ॥ ६२ ॥
अपवादरताकाङ्क्षी विल्वानाभद्रकम्बलः ।
शिविवाराहनोन्मत्तो विशालाक्षी परन्तपः ॥ ६३ ॥
गोपनीया सुगोप्ता च पार्वती परमेश्वरः ।
श्रीमातङ्गी त्रिपीठस्थो विकारी ध्याननिर्मलः ॥ ६४ ॥
चातुरी चतुरानन्दः पुत्रिणी सुतवत्सलः ।
वामनी विषयानन्दः किङ्करी क्रोधजीवनः ॥ ६५ ॥
चन्द्रानना प्रियानन्दः कुशला केतकीप्रियः ।
प्रचला तारकज्ञानी त्रिकर्मा नर्मदापतिः ॥ ६६ ॥
कपाटस्था कलापस्थो विद्याज्ञा वर्धमानगः ।
त्रिकूटा त्रिविधानन्दो नन्दना नन्दनप्रियः ॥ ६७ ॥
विचिकित्सा समाप्ताङ्गो मन्त्रज्ञा मनुवर्धनः ।
मन्त्रिका चाम्बिकानाथो विवाशी वंशवर्धनः ॥ ६८ ॥

वज्रजिह्वा वज्रदन्तो विक्रिया क्षेत्रपालनः ।
विकारणी पार्वतीशः प्रियाङ्गी पञ्चचामरः ॥ ६९ ॥
आंशिका वामदेवाद्या विमायाद्या परापरः ।
पायाङ्गी परमैश्वर्या दाता भोक्त्री दिवाकरः ॥ ७० ॥
कामदात्री विचित्राक्षो रिपुरक्षा क्षपान्तकृत् ।
घोरमुखी घर्घराख्यो विलज्वा ज्वालिनीपतिः ॥ ७१ ॥
ज्वालामुखी धर्मकर्ता श्रीकर्त्री कारणात्मकः ।
मुण्डाली पञ्चचूडाश्च त्रिशावर्णा स्थिताग्रजः ॥ ७२ ॥
विरूपाक्षी बृहद्गर्भो राकिनी श्रीपितामहः ।
वैष्णवी विष्णुभक्तश्च डाकिनी डिण्डिमप्रियः ॥ ७३ ॥
रतिविद्या रामनाथो राधिका विष्णुलक्षणः ।
चतुर्भुजा वेदहस्तो लाकिनी मीनकुन्तलः ॥ ७४ ॥
मूर्धजा लाङ्गलीदेवः स्थविरा जीर्णविग्रहः ।
लाकिनीशा लाकिनीशः प्रियाख्या चारुवाहनः ॥ ७५ ॥
जटिला त्रिजटाधारी चतुराङ्गी चराचरः ।
त्रिश्रोता पार्वतीनाथो भुवनेशी नरेश्वरः ॥ ७६ ॥
पिनाकिनी पिनाकी च चन्द्रचूडा विचारवित् ।
जाड्यहन्त्री जडात्मा च जिह्वायुक्तो जरामरः ॥ ७७ ॥
अनाहताख्या राजेन्द्रः काकिनी सात्त्विकस्थितः ।
मरुन्मूर्ति पद्महस्तो विशुद्धा शुद्धवाहनः ॥ ७८ ॥
वृषली वृषपृष्ठस्थो विभोगा भोगवर्धनः ।
यौवनस्था युवासाक्षी लोकाद्या लोकसाक्षिणी ॥ ७९ ॥
बगला चन्द्रचूडाख्यो भैरवी मत्तभैरवः ।
क्रोधाधिपा वज्रधारी इन्द्राणी वह्निवल्लभः ॥ ८० ॥
निर्विकारा सूत्रधारी मत्तपाना दिवाश्रयः ।
शब्दगर्भा शब्दमयो वासवा वासवानुजः ॥ ८१ ॥
दिक्पाला ग्रहनाथश्च ईशानी नरवाहनः ।
यक्षिणीशा भूतिनीशो विभूतिर्भूतिवर्धनः ॥ ८२ ॥
जयावती कालकारी कल्क्यविद्या विधानवित् ।
लज्जातीता लक्षणाङ्गो विषपायी मदाश्रयः ॥ ८३ ॥
विदेशिनी विदेशस्थोऽपापा पापवर्जितः ।
अतिक्षोभा कलातीतो निरिन्द्रियगणोदया ॥ ८४ ॥
वाचालो वचनग्रन्थिमन्दरो वेदमन्दिरा ।
पञ्चमः पञ्चमीदुर्गो दुर्गा दुर्गतिनाशनः ॥ ८५ ॥
दुर्गन्धा गन्धराजश्च सुगन्धा गन्धचालनः ।
चार्वङ्गी चर्वणप्रीतो विशङ्का मरलारवित् ॥ ८६ ॥

अतिथिस्था स्थावराद्या जपस्था जपमालिनी ।
वसुन्धरसुता तार्क्षी तार्कीकः प्राणतार्कीकः ॥ ८७ ॥
तालवृक्षावृतोन्नासा तालजाया जटाधरः ।
जटिलेशी जटाधारी सप्तमीशः प्रसप्तमी ॥ ८८ ॥
अष्टमीवेशकृत् काली सर्वः सर्वेश्वरीश्वरः ।
शत्रुहन्त्री नित्यमन्त्री तरुणी तारकाश्रयः ॥ ८९ ॥
धर्मगुप्तिः सारगुप्तो मनोयोगा विषापहः ।
वज्रावीरः सुरासौरी चन्द्रिका चन्द्रशेखरः ॥ ९० ॥
विटपीन्द्रा वटस्थानी भद्रपालः कुलेश्वरः ।
चातकाद्या चन्द्रदेहः प्रियाभार्या मनोयवः ॥ ९१ ॥
तीर्थपुण्या तीर्थयोगी जलजा जलशायकः ।
भूतेश्वरप्रियाभूतो भगमाला भगाननः ॥ ९२ ॥
भगिनी भगवान् भोग्या भवती भीमलोचनः ।
भृगुपुत्री भार्गवेशः प्रलयालयकारणः ॥ ९३ ॥
रुद्राणी रुद्रगणपो रौद्राक्षी क्षीणवाहनः ।
कुम्भान्तका निकुम्भारिः कुम्भान्ती कुम्भिनीरगः ॥ ९४ ॥
कूष्माण्डी धनरत्नाढ्यो महोग्राग्राहकः शुभा ।
शिविरस्था शिवानन्दः शवासनकृतासनी ॥ ९५ ॥
प्रशंसा समनः प्राज्ञा विभाव्या भव्यलोचनः ।
कुरुविद्या कौरवंशः कुलकन्या मृणालधृक् ॥ ९६ ॥
द्विदलस्था परानन्दो नन्दिसेव्या बृहन्नला ।
व्याससेव्या व्यासपूज्यो धरणी धीरलोचनः ॥ ९७ ॥
त्रिविधारण्या तुलाकोटिः कार्पासा खार्पराङ्गधृक् ।
वशिष्ठाराधिताविष्टो वशगा वशजीवनः ॥ ९८ ॥
खड्गहस्ता खड्गधारी शूलहस्ता विभाकरः ।
अतुला तुलनाहीनो विविधा ध्याननिर्णयः ॥ ९९ ॥
अप्रकाश्या विशोध्यश्च चामुण्डा चण्डवाहनः ।
गिरिजा गायनोन्मत्तो मलामाली चलाधमः ॥ १०० ॥
पिङ्गदेहा पिङ्गकेशोऽसमर्था शीलवाहनः ।
गारुडी गरुडानन्दो विशोका वंशवर्धनः ॥ १०१ ॥
वेणीन्द्रा चातकप्रायो विद्याद्या दोषमर्दकः ।
अट्टहासा अट्टहासो मधुभक्षा मधुव्रतः ॥ १०२ ॥
मधुरानन्दसम्पन्ना माधवो मधुनाशिका ।
माकरी मकरप्रेमो माघस्था मघवाहनः ॥ १०३ ॥
विशाखा सुसखा सूक्ष्मा ज्येष्ठो ज्येष्ठजनप्रिया ।
आषाढनिलयाषाढो मिथिला मैथिलीश्वरः ॥ १०४ ॥

शीतशैत्यगतो वाणी विमलालक्षणेश्वरः ।
अकार्यकार्यजनको भद्रा भाद्रपदीयकः ॥ १०५ ॥
प्रवरा वरहंसाख्यः पवशोभा पुराणवित् ।
श्रावणी हरिनाथश्च श्रवणा श्रवणाङ्कुरः ॥ १०६ ॥
सुकर्त्री साधनाध्यक्षो विशोध्या शुद्धभावनः ।
एकशेषा शशिधरो धरान्तः स्थावराधरः ॥ १०७ ॥
धर्मपुत्री धर्ममात्रो विजया जयदायकः ।
दासरक्षादि विदशकलापो विधवापतिः ॥ १०८ ॥
विधवाधवलो धूर्तः धूर्ताढ्यो धूर्तपालिका ।
शङ्करः कामगामी च देवला देवमायिका ॥ १०९ ॥
विनाशो मन्दराच्छन्ना मन्दरस्थो महाद्वया ।
अतिपुत्री त्रिमुण्डी च मुण्डमाला त्रिचण्डिका ॥ ११० ॥
कर्कटीशः कोटरश्च सिंहिका सिंहवाहनः ।
नारसिंही नृसिंहश्च नर्मदा जाह्नवीपतिः ॥ १११ ॥
त्रिविधस्त्री त्रिसर्गास्त्रो दिगम्बरो दिगम्बरी ।
मुञ्चानो मञ्चभेदी च मालञ्चा चञ्चलाग्रजः ॥ ११२ ॥
कट्टुतुङ्गी विकाशात्मा ऋद्धिस्पष्टाक्षरोऽन्तरा ।
विरिञ्चः प्रभवानन्दो नन्दिनी मन्दराद्रिधृक् ॥ ११३ ॥
कालिकाभा काञ्चनाभो मदिराद्या मदोदयः ।
द्रविडस्था दाडिमस्थो मज्जातीता मरुद्गतिः ॥ ११४ ॥
क्षान्तिप्रज्ञो विधिप्रज्ञा वीतिज्ञोत्सुकनिश्चया ।
अभावो मलिनाकारा कारागारा विचारहा ॥ ११५ ॥
शब्दः कटाहभेदात्मा शिशुलोकप्रपालिका ।
अतिविस्तारवदनो विभवानन्दमानसा ॥ ११६ ॥
आकाशवसनोन्मादी मेपुरा मांसचर्वणः ।
अतिकान्ता प्रशान्तात्मा नित्यगुह्या गभीरगः ॥ ११७ ॥
त्रिगम्भीरा तत्त्ववासी राक्षसी पूतनाक्षरः ।
अभोगगणिका हस्ती गणेशजननीश्वरः ॥ ११८ ॥
कुण्डपालककर्ता च त्रिरूण्डा रुण्डभालधृक् ।
अतिशक्ता विशक्तात्मा देव्याङ्गी नन्दनाश्रयः ॥ ११९ ॥
भावनीया भ्रान्तिहरः कापिलाभा मनोहरः ।
आर्यादेवी नीलवर्णा सायको बलवीर्यदा ॥ १२० ॥
सुखदो मोक्षदाताऽतो जननी वाञ्छितप्रदः ।
चातिरूपा विरूपस्थो वाच्या वाच्यविवर्जितः ॥ १२१ ॥
महालिङ्गसमुत्पन्ना काकभेरी नदस्थितः ।
आत्मारामकलाकायः सिद्धिदाता गणेश्वरी ॥ १२२ ॥

कल्पद्रुमः कल्पलता कुलवृक्षः कुलद्रुमा ।
सुमना श्रीगुरुमयी गुरुमन्त्रप्रदायकः ॥ १२३ ॥
अनन्तशयनाऽनन्तो जलेशी जह्नजेश्वरः ।
गङ्गा गङ्गाधरः श्रीदा भास्करेशो महाबला ॥ १२४ ॥
गुप्ताक्षरो विधिरता विधानपुरुषेश्वरः ।
सिद्धकलङ्का कुण्डाली वाग्देवः पञ्चदेवता ॥ १२५ ॥
अल्पातीता मनोहारी त्रिविधा तत्त्वलोचना ।
अमायापतिर्भूभ्रान्तिः पाञ्चजन्यधरोऽग्रजा ॥ १२६ ॥
अतितप्तः कामतप्ता मायामोहविवर्जितः ।
आर्या पुत्रीश्वरः स्थाणुः कृशानुस्था जलाप्लुतः ॥ १२७ ॥
वारुणी मदिरामत्तो मांसप्रेमदिगम्बरा ।
अन्तरस्थो देहसिद्धा कालानलसुराद्रिपः ॥ १२८ ॥
आकाशवाहिनी देवः काकिनीशो दिगम्बरी ।
काकचञ्चुपुटमधुहरो गगनमाब्धिपा ॥ १२९ ॥
मुद्राहारी महामुद्रा मीनपो मीनभक्षिणी ।
शाकिनी शिवनाथेशः काकोर्ध्वेशी सदाशिवः ॥ १३० ॥
कमला कण्ठकमलः स्थायुकः प्रेमनायिका ।
मृणालमालाधारी च मृणालमालामालिनी ॥ १३१ ॥
अनादिनिधना तारा दुर्गतारा निरक्षरा ।
सर्वाक्षरा सर्ववर्णा सर्वमन्त्राक्षमालिका ॥ १३२ ॥
आनन्दभैरवो नीलकण्ठो ब्रह्माण्डमण्डितः ।
शिवो विश्वेश्वरोऽनन्तः सर्वातीतो निरञ्जनः ॥ १३३ ॥
इति ते कथितं नाथ त्रैलोक्यसारमङ्गलम् ।
भुवनमङ्गलं नाम महापातकनाशनम् ॥ १३४ ॥
अस्य प्रपठनेऽपि च यत्फलं लभते नरः ।
तत्सर्वं कथितुं नालं कोटिवर्षशतैरपि ॥ १३५ ॥
तथापि तव यत्नेन फलं शृणु दयार्णव ।
राजद्वारे नदीतीरे सङ्ग्रामे विजनेऽनले ॥ १३६ ॥
शून्यागारे निर्जने वा घोरान्धकाररात्रिके ।
चतुष्टये श्मशाने वा पठित्वा षोडशे दले ॥ १३७ ॥
रक्ताम्भोजैः पूजयित्वा मनसा कामचिन्तयन् ।
घृताक्तैर्जुहुयान्नित्यं नाम प्रत्येकमुच्चरन् ॥ १३८ ॥
मूलमन्त्रेण पुटितमाज्यं वह्नौ समर्पयेत् ।
अन्तरे स्वसुखे होमः सर्वसिद्धिसुखप्रदः ॥ १३९ ॥
सद्योमधुयुतैर्मांसैः सुसुखे मन्त्रमुच्चरन् ।
प्रत्येकं नामपुटितं हुत्वा पुनर्मुखाम्बुजे ॥ १४० ॥

कुण्डलीरसजिह्वायां जीवन्मुक्तो भवेन्नरः ।
धृत्वा वापि पठित्वा वा स्तुत्वा वा विधिना प्रभो ॥१४१ ॥
महारुद्रो भवेत्साक्षान्मम देहान्वितो भवेत् ।
योगी ज्ञानी भवेत् सिद्धः सारसङ्केतदर्शकः ॥१४२ ॥
अपराजितः सर्वलोके किमन्यत् फलसाधनम् ।
धृत्वा राजत्वमाप्नोति कण्ठे पृथ्वीश्वरो भवेत् ॥१४३ ॥
दक्षहस्ते तथा धृत्वा धनवान् गुणवान् भवेत् ।
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ॥१४४ ॥
हुत्वा राजेन्द्रनाथश्च महावाग्मी सदाऽभयः ।
सर्वेषां मथनं कृत्वा गणेशो मम कार्तीकः ॥१४५ ॥
देवनामधिपो भूत्वा सर्वज्ञो भवति प्रभो ।
यथा तथा महायोगी भ्रमत्येव न संशयः ॥१४६ ॥
प्रातःकाले पठेद् यस्तु मस्तके स्तुतिधारकः ।
जलस्तम्भं करोत्येव रसस्तम्भं तथैव च ॥१४७ ॥
राज्यस्तम्भं नरस्तम्भं वीर्यस्तम्भं तथैव च
विद्यास्तम्भं सुखस्तम्भं क्षेत्रस्तम्भं तथैव च ॥१४८ ॥
राजस्तम्भं धनस्तम्भं ग्रामस्तम्भं तथैव च
मध्याह्ने च पठेद् यस्तु वह्निस्तम्भं करोत्यपि ॥१४९ ॥
कालस्तम्भं वयःस्तम्भं श्वासस्तम्भं तथैव च ।
रसस्तम्भं वायुस्तम्भं बाहुस्तम्भं करोत्यपि ॥१५० ॥
सायाह्ने च पठेद् यस्तु कण्ठोदरे च धारयन् ।
मन्त्रस्तम्भं शिलास्तम्भं शास्त्रस्तम्भं करोत्यपि ॥१५१ ॥
हिरण्यरजतस्तम्भं वज्रस्तम्भं तथैव च ।
अकालत्वादिसंस्तम्भं वातस्तम्भं करोत्यपि ॥१५२ ॥
पारदस्तम्भनं शिल्पकल्पना ज्ञानस्तम्भनम् ।
आसनस्तम्भनं व्याधिस्तम्भनं बन्धनं रिपोः ॥१५३ ॥
षट्पद्मस्तम्भनं कृत्वा योगी भवति निश्चितम् ।
वन्ध्या नारी लभेत् पुत्रं सुन्दरं सुमनोहरम् ॥१५४ ॥
भ्रष्टो मनुष्यो राजेन्द्रः किमन्ये साधवो जनाः ।
श्रवणान्मकरे लग्ने चित्रायोगे च पर्वणि ॥१५५ ॥
हिरण्ययोगे वायव्यां लिखित्वा माघमासके ।
वैशाखे राजयोगे वा रोहिण्याख्या विशेषतः ॥१५६ ॥
श्रीमद्भुवनमङ्गलं नाम यशोदातृ भवेद् ध्रुवम् ।
जायन्ते राजवल्लभा अमराः खेचरा लिखनेन ॥१५७ ॥
धर्मार्थकाममोक्षं च प्राप्नुवन्ति च पाठकाः ।
कीर्तिरात्मदृष्टिपातं लभते नात्र संशयः ॥१५८ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे भैरवीभैरवसंवादे शाकिनीसदाशिवस्तवनमङ्गलाष्टोत्तरसहस्रनाम सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated May 25, 2009
http://sanskritdocuments.org